

श्रीगणेशाय नमः ॥ ॥ अथावधूतगी-
ताप्रारंभः ॥ ईश्वरानुग्रहादेव पुंसामद्वैतवासना ॥ महद्भयपरित्राणाद्विप्राणामुपजायते ॥ १ ॥ येनेदं पूरितं सर्वमात्मनैवात्मनात्मनि ॥ निराकारं कथं वन्दे ह्यभिन्नं शिवमव्ययम् ॥ २ ॥ पञ्चभूतात्मकं विश्वं मरीचिजलसन्नि-

भम् ॥ कस्याप्यहो नमस्कुर्यामहमे-
को निरञ्जनः ॥ ३ ॥ आत्मैव केव-
लं सर्वं भेदाभेदो न विद्यते ॥ अस्ति
नास्ति कथं ब्रूयां विस्मयः प्रतिभाति
मे ॥ ४ ॥ वेदान्तसारसर्वस्वं ज्ञानं
विज्ञानमेव च ॥ अहमात्मा निराका- १
रः सर्वव्यापी स्वभावतः ॥ ५ ॥ यो

वै सर्वात्मको देवो निष्कलो गग-
नोपमः ॥ स्वभावनिर्मलः शुद्धः स ए-
वाहं न संशयः ॥ ६ ॥ अहमेवाव्ययो-
ऽनन्तः शुद्धविज्ञानविग्रहः ॥ सुखं दुः-
खं न जानामि कथं कस्यापि वर्तते
॥ ७ ॥ न मानसं कर्म शुभाशुभं मे
न कायिकं कर्म शुभाशुभं मे ॥ न वा-

अव. चिकं कर्म शुभाशुभं मे ज्ञानामृतं शु- अ०
२ द्धमतीन्द्रियोऽहम् ॥ ८ ॥ मनो वै गग- १
नाकारं मनो वै सर्वतोमुखम् ॥ मनो-
ऽतीतं मनः सर्वं न मनः परमार्थतः
॥ ९ ॥ अहमेकमिदं सर्वं व्योमातीतं
निरन्तरम् ॥ पश्यामि कथमात्मानं २
प्रत्यक्षं वा तिरोहितम् ॥ १० ॥ त्वमे-

वमेकं हि कथं न बुध्यसे समं हि सर्वे-
षु विमृष्टमव्ययम् ॥ सदोदितोऽसि
त्वमखण्डितः प्रभो दिवा च नक्तं च
कथं हि मन्यसे ॥ ११ ॥ आत्मानं स-
ततं विद्धि सर्वत्रैकं निरन्तरम् ॥ अहं
ध्याता परं ध्येयमखण्डं खण्ड्यते कथ-
म् ॥१२॥ न जातो न मृतोऽसि त्वं न

अव. ३ ते देहः कदाचन ॥ सर्वं ब्रह्मेति वि- अ० १
ख्यातं ब्रवीति वहुधा श्रुतिः ॥ १३ ॥
स वाह्याभ्यन्तरोऽसि त्वं शिवः सर्व-
त्र सर्वदा ॥ इतस्ततः कथं भ्रान्तः प्र-
धावसि पिशाचवत् ॥ १४ ॥ संयोग-
श्च वियोगश्च वर्तते न च ते न मे ॥
न त्वं नाहं जगन्नेदं सर्वमात्मैव केवल- ३

म् ॥१५॥ शब्दादिपञ्चकस्यास्य नैवा-
सि त्वं न ते पुनः ॥ त्वमेव परमं तत्त्व-
मतः किं परितप्यसे ॥ १६ ॥ जन्ममृ-
त्युर्न ते चित्तं बन्धमोक्षौ शुभाशुभौ ॥
कथं रोदिषि रे वत्स नामरूपं न ते न
मे ॥ १७ ॥ अहो चित्त कथं भ्रान्तः
प्रधावसि पिशाचवत् ॥ अभिन्नं पश्य

चात्मानं रागत्यागात्सुखी भव ॥१८॥
त्वमेव तत्त्वं हि विकारवर्जितं निष्क-
म्पमेकं हि विमोक्षविग्रहम् ॥ न ते च
रागो ह्यथवा विरागः कथं हि संतप्य-
सि कामकामतः ॥ १९ ॥ वदन्ति श्रु-
तयः सर्वा निर्गुणं शुद्धमव्ययम् ॥ अ-
शरीरं समं तत्त्वं तन्मां विद्धि न संश-

यः ॥ २० ॥ साकारमनृतं विद्धि नि-
राकारं निरन्तरम् ॥ एतत्तत्त्वोपदेशे-
न न पुनर्भवसंभवः ॥ २१ ॥ एकमेव
समं तत्त्वं वदन्ति हि विपश्चितः ॥
रागत्यागात्पुनश्चित्तमेकानेकं न विद्य-
ते॥२२॥ अनात्मरूपं च कथं समाधि-
रात्मस्वरूपं च कथं समाधिः ॥ अ-

अव. स्तीति नास्तीति कथं समाधिर्मोक्ष- अ०
५ स्वरूपं यदि सर्वमेकम् ॥ २३ ॥ वि- १
शुद्धोऽसि समं तत्त्वं विदेहस्त्वमजो-
ऽव्ययः ॥ जानामीह न जानामीत्या-
त्मानं मन्यसे कथम् ॥ २४ ॥ त-
त्त्वमस्यादिवाक्येन स्वात्मा हि प्रति- ५
पादितः ॥ नेति नेति श्रुतिर्ब्रूयादनृतं

पाञ्चभौतिकम् ॥ २५ ॥ आत्मन्येवा-
त्मना सर्वं त्वया पूर्णं निरन्तरम् ॥ ध्या-
ता ध्यानं न ते चित्तं निर्लज्जं ध्यायते
कथम् ॥ २६ ॥ शिवं न जानामि कथं
वदामि शिवं न जानामि कथं भजामि॥
अहं शिवश्चेत्परमार्थतत्त्वं समस्वरूपं
गगनोपमं च ॥ २७ ॥ नाहं तत्त्वं स-

मं तत्त्वं कल्पनाहेतुवर्जितम् ॥ ग्राह्य-
ग्राहकनिर्मुक्तं स्वसंवेद्यं कथं भवेत् २८
अनन्तरूपं न हि वस्तु किंचित्तत्त्वस्व-
रूपं न हि वस्तु किंचित् ॥ आत्मैक-
रूपं परमार्थतत्त्वं न हिंसको वापि न
चाप्यहिंसा ॥ २९ ॥ विशुद्धोऽसि समं
तत्त्वं विदेहमजमव्ययम् ॥ विभ्रमं क-

थमात्मार्थे विभ्रान्तोऽहं कथं पुनः३०
घटे भिन्ने घटाकाशं सुलीनं भेदवर्जि-
तम् ॥ शिवेन मनसा शुद्धो न भेदः
प्रतिभाति मे ॥ ३१ ॥ न घटो न घ-
टाकाशो न जीवो जीवविग्रहः ॥ केव-
लं ब्रह्म संविद्धि वेद्यावेदकवार्जितम्
॥ ३२ ॥ सर्वत्र सर्वदा सर्वमात्मानं स-

ततं ध्रुवम् ॥ सर्वं शून्यमशून्यं च त-
न्मां विद्धि न संशयः ॥ ३३ ॥ वेदा न
लोका न सुरा न यज्ञा वर्णाश्रमो नैव
कुलं न जातिः ॥ न धूममार्गो न च
दीप्तिमार्गो ब्रह्मैकरूपं परमार्थतत्त्वम्
॥ ३४ ॥ व्याप्यव्यापकनिर्मुक्तं त्वमेकः
सफलं यदि ॥ प्रत्यक्षं चापरोक्षं च

आत्मानं मन्यसे कथम् ॥ ३५ ॥ अ-
द्वैतं केचिदिच्छन्ति द्वैतमिच्छन्ति चा-
परे ॥ समं तत्त्वं न विन्दन्ति द्वैताद्वैत-
विवर्जितम् ॥ ३६ ॥ श्वेतादिवर्णरहितं
शब्दादिगुणवर्जितम् ॥ कथयन्ति क-
थं तत्त्वं मनोवाचामगोचरम् ॥ ३७ ॥
यदाऽनृतमिदं सर्वं देहादि गगनोपम-

म् ॥ तदा हि ब्रह्म संवेत्ति न ते द्वैतप-
रंपरा ॥ ३८ ॥ परेण सहजात्मापि ह्य-
भिन्नः प्रतिभाति मे ॥ व्योमाकारं तथै-
वैकं ध्याता ध्यानं कथं भवेत् ॥ ३९ ॥
यत्करोमि यदश्नामि यज्जुहोमि ददा-
मि यत् ॥ एतत्सर्वं न मे किंचिद्विशु-
द्धोऽहमजोऽव्ययः ॥ ४० ॥ सर्वं जग- ८

द्विद्धि निराकृतीदं सर्वं जगाद्विद्धि विका-
रहीनम् ॥ सर्वं जगद्विद्धि विशुद्धदेहं
सर्वं जगाद्विद्धि शिवैकरूपम् ॥ ४१ ॥
तत्त्वं त्वं हि न संदेहः किं जानाम्यथ-
वा पुनः ॥ असंवेद्यं स्वसंवेद्यमात्मानं
मन्यसे कथम्॥ ४२ ॥ माया माया क-
थं तात छाया छाया न विद्यते ॥ त-

त्वमेकमिदं सर्वं व्योमाकारं निरञ्जनम्
॥ ४३ ॥ आदिमध्यान्तमुक्तोऽहं न ब-
द्धोऽहं कदाचन ॥ स्वभावनिर्मलः शु-
द्ध इति मे निश्चिता मतिः ॥ ४४ ॥
महदादि जगत्सर्वं न किंचित्प्रतिभा-
ति मे ॥ ब्रह्मैव केवलं सर्वं कथं वर्णा- १
श्रमस्थितिः ॥ ४५ ॥ जानामि सर्व-

था सर्वमहमेको निरन्तरम् ॥ निराल-
म्बमशून्यं च शून्यं व्योमादिपञ्चकम्
॥ ४६ ॥ न षण्ढो न पुमान्न स्त्री न बो-
धो नैव कल्पना ॥ सानन्दो वा निरान-
न्दमात्मानं मन्यसे कथम् ॥ ४७ ॥ ष-
डङ्गयोगान्न तु नैव शुद्धं मनोविनाशा-
न्न तु नैव शुद्धम् ॥ गुरूपदेशान्न तु नै-

अव. व शुद्धं स्वयं च तत्त्वं स्वयमेव बुद्धम् अ०
१० ॥ ४८ ॥ नहि पञ्चात्मको देहो विदे- १
हो वर्तते नहि ॥ आत्मैव केवलं सर्वं
तुरीयं च त्रयं कथम् ॥ ४९ ॥ न बद्धो
नैव मुक्तोऽहं न चाहं ब्रह्मणः पृथक् ॥
न कर्ता न च भोक्ताहं व्याप्यव्याप- १०
कवर्जितः ॥ ५० ॥ यथा जलं जले

न्यस्तं सलिलं भेदवर्जितम् ॥ प्रकृतिं
पुरुषं तद्वदभिन्नं प्रतिभाति में ॥
॥ ५१ ॥ यदि नाम न मुक्तोऽसि न
बद्धोऽसि कदाचन ॥ साकारं च निरा-
कारमात्मानं मन्यसे कथम् ॥ ५२ ॥
जानामि ते परं रूपं प्रत्यक्षं गगनोपम-
म् ॥ यथापरं हि रूपं यन्मरीचिजल-

सन्निभम् ॥ ५३ ॥ न गुरुर्नोपदेशश्च
न चोपाधिर्न मे क्रिया ॥ विदेहं गग-
नं विद्धि विशुद्धोऽहं स्वभावतः ॥५४॥
विशुद्धोऽस्य शरीरोऽसि न ते चित्तं प-
रात्परम् ॥ अहं चात्मा परं तत्त्वमिति
वक्तुं न लज्जसे ॥ ५५ ॥ कथं रोदिषि
रे चित्त ह्यात्मैवात्मनात्मना भव ॥ पिब ११

वत्स कलातीतमद्वैतं परमामृतम् ॥
॥ ५६ ॥ नैव वोधो न चावोधो न बो-
धावोध एव च ॥ यस्येदृशः सदा बो-
धः स वोधो नान्यथा भवेत् ॥ ५७ ॥
ज्ञानं न तर्को न समाधियोगो न दे-
शकालौ न गुरूपदेशः ॥ स्वभावसं-
वित्तिरहं च तत्त्वमाकाशकल्पं सहजं

ध्रुवं च ॥ ५८ ॥ न जातोऽहं मृतो वा-
पि न मे कर्म शुभाशुभम् ॥ विशुद्धं
निर्गुणं ब्रह्म बन्धो मुक्तिः कथं मम ५९
यदि सर्वगतो देवः स्थिरः पूर्णो निर-
न्तरः ॥ अन्तरं हि न पश्यामि सबा-
ह्याभ्यन्तरः कथम् ॥ ६० ॥ स्फुरत्येव
जगत्कृत्स्नमखण्डितनिरन्तरम् ॥ अ-

हो माया महामोहो द्वैताद्वैतविकल्पना
॥ ६१ ॥ साकारं च निराकारं नेति ने-
तीति सर्वदा ॥ भेदाभेदविनिर्मुक्तो
वर्तते केवलः शिवः ॥ ६२ ॥ न ते च
माता च पिता च बंधुर्न ते च पत्नी
न सुतश्च मित्रम् ॥ न पक्षपातो न वि-
पक्षपातः कथं हि संतप्तिरियं हि चित्ते

अव. ॥ ६३ ॥ दिवा नक्तं न ते चित्त उद- अ०
१३ यास्तमयौ नहि ॥ विदेहस्य शरीरत्वं १
कल्पयन्ति कथं बुधाः ॥ ६४ ॥ नावि-
भक्तं विभक्तं च नहि दुःखसुखादि च ॥
नहि सर्वमसर्वं च विद्धि चात्मानमव्य-
यम् ॥ ६५ ॥ नाहं कर्ता न भोक्ता च न १३
मे कर्म पुराधुना ॥ न मे देहो विदेहो वा

निर्ममेति ममेति किम् ॥ ६६ ॥ न मे
रागादिको दोषो दुःखं देहादिकं न मे॥
आत्मानं विद्धि मामेकं विशालं गगनो-
पमम् ॥ ६७ ॥ सखे मनः किं वहुज-
ल्पितेन सखे मनः सर्वमिदं वितर्क्यम्॥
यत्सारभूतं कथितं मया ते त्वमेव त-
त्त्वं गगनोपमोऽसि ॥६८॥ येन केना-

अव. पि भावेन यत्र कुत्र मृता अपि ॥ यो- अ०
१४ गिनस्तत्र लीयन्ते घटाकाशमिवाम्बरे १
॥ ६९ ॥ तीर्थे चान्त्यजगेहे वा नष्टस्मृ-
तिरपि त्यजन् ॥ समकाले तनुं मुक्तः
कैवल्यव्यापको भवेत् ॥ ७० ॥ धर्मार्थ-
काममोक्षांश्च द्विपदादिचराचरम् ॥ म- १४
न्यन्ते योगिनः सर्वं मरीचिजलसन्नि-

भम् ॥ ७१ ॥ अतीतानागतं कर्म वर्त-
मानं तथैव च ॥ न करोमि न भुञ्जामि
इति मे निश्चला मतिः ॥ ७२ ॥ शून्या-
गारे समरसपूतस्तिष्ठन्नेकः सुखमव-
धूतः ॥ चरति हि नग्नस्त्यक्त्वा गर्वं वि-
न्दति केवलमात्मनि सर्वम् ॥७३॥ त्रि-
तयतुरीयं नहि नहि यत्र विन्दति केव-

अव. लसमात्मनि तत्र ॥ धर्माधर्मौ नहि नहि अ०
१८ यत्र बद्धो मुक्तः कथमिह तत्र ॥ ७४ ॥ १
विन्दति विन्दति नहि नहि मन्त्रं छ-
न्दोलक्षणं नहि नहि तन्त्रम् ॥ समर-
समग्नो भावितपूतः प्रलपितमेतत्पर-
मवधूतः ॥ ७५ ॥ सर्वशून्यमशून्यं च
सत्यासत्यं न विद्यते ॥ स्वभावभावतः १८

प्रोक्तं शास्त्रसंवित्तिपूर्वकम् ॥ ७६ ॥

॥ इति श्रीदत्तात्रेयविरचितायामवधूतगीतायामात्मसंवित्त्युपदेशो नाम प्रथमोऽध्यायः ॥ १ ॥

अवधूत उवाच ॥ ॥ बालस्य वा विषयभोगरतस्य वापि मूर्खस्य सेवकजनस्य गृहस्थितस्य ॥ एतद्गुरोः कि-

अव. मपि नैव न चिन्तनीयं रत्नं कथं त्य- अ०
१६ जति कोऽप्यशुचौ प्रतिष्ठम् ॥ १ ॥ नै- १
वात्र काव्यगुण एव तु चिन्तनीयो
ग्राह्यः परं गुणवता खलु सार एव ॥
सिन्दूरचित्ररहिता भुवि रूपशून्या
पारं न किं नयति नौरिह गन्तुकामा-
न ॥ २ ॥ प्रयत्नेन विना येन निश्च- १६

लेन चलाचलम् ॥ ग्रस्तं स्वभावतः
शान्तं चैतन्यं गगनोपमम् ॥ ३ ॥ अ-
यत्नाच्चालयेद्यस्तु एकमेव चराचरम् ॥
सर्वगं तत्कथं भिन्नमद्वैतं वर्तते मम
॥ ४ ॥ अहमेव परं यस्मात्सारासार-
तरं शिवम् ॥ गमागमविनिर्मुक्तं निर्वि-
कल्पं निराकुलम् ॥ ५ ॥ सर्वावयवनि-

मुक्तं तदहं त्रिदशार्चितम् ॥ संपूर्ण-
त्वान्न गृह्णामि विभागं त्रिदशादिकम्
॥ ६ ॥ प्रमादेन न संदेहः किं करिष्या-
मि वृत्तिवान् ॥ उत्पद्यन्ते विलीयन्ते
बुद्बुदाश्च यथा जले ॥ ७ ॥ महदादी-
नि भूतानि समाप्यैवं सदैव हि ॥ मृ-
दुद्रव्येषु तीक्ष्णेषु गुडेषु कटुकेषु च ॥ ८

कुटुत्वं चैव शैत्यत्वं मृदुत्वं च यथा जले ॥ प्रकृतिः पुरुषस्तद्वदभिन्नं प्रतिभाति मे ॥ ९ ॥ सर्वाख्यारहितं यद्यत्सूक्ष्मात्सूक्ष्मतरं परम् ॥ मनोबुद्धींद्रियातीतमकलङ्कं जगत्पतिम् ॥ १० ॥ ईदृशं सहजं यत्र अहं तत्र कथं भवे ॥ त्वमेव हि कथं तत्र कथं तत्र चराचर-

अव. १८ मू ॥११॥ गगनोपमं तु यत्प्रोक्तं तदेव अ० २
गगनोपमम् ॥ चैतन्यं दोषहीनं च स-
र्वज्ञं पूर्णमेव च ॥१२॥ पृथिव्यां चरि-
तं नैव मारुतेन च वाहितम् ॥ वारिणा-
पिहितं नैव तेजोमध्ये व्यवस्थितम्
॥१३॥आकाशं तेन संव्याप्तं न तद्व्याप्तं १८
च केनचित ॥ सबाह्याभ्यन्तरं तिष्ठ-

त्यवच्छिन्नं निरन्तरम् ॥ १४ ॥ सूक्ष्म-
त्वात्तदृश्यत्वान्निर्गुणत्वाच्च योगिभिः
॥ आलम्बनादि यत्प्रोक्तं क्रमादाल-
म्बनं भवेत् ॥ १५ ॥ सतताऽभ्यास-
युक्तस्तु निरालम्बो यदा भवेत् ॥ त-
ल्लयाल्लीयते नान्तर्गुणदोषविवर्जितः
॥ १६ ॥ विषविश्वस्य रौद्रस्य मोहमू-

अव. १९ | अ० २

च्छीप्रदस्य च ॥ एकमेव विनाशाय
ह्यमोघं सहजामृतम् ॥१७॥ भावग-
म्यं निराकारं साकारं दृष्टिगोचरम् ॥
भावाभावविनिर्मुक्तमन्तरालं तदुच्य-
ते ॥ १८ ॥ बाह्यभावं भवेद्विश्वमन्तः
प्रकृतिरुच्यते ॥ अन्तरादन्तरंमज्ञेयं १९
नालिकेरफलाम्बुवत् ॥ १९ ॥ भ्रान्ति-

ज्ञानं स्थितं बाह्ये सम्यग्ज्ञानं च मध्य-
गम्॥मध्यान्मध्यतरं ज्ञेयं नालिकेरफ-
लाम्बुवत् ॥२०॥ पौर्णमास्यां यथा च-
न्द्र एक एवातिनिर्मलः॥ तेन तत्सदृ-
शं पश्येद्द्विधादृष्टिर्विपर्ययः ॥२१॥ अ-
नेनैव प्रकारेण बुद्धिभेदो न सर्वगः ॥
दाता च धीरतामेति गीयते नामको-

अव. टिभिः ॥ २२ ॥ गुरुप्रज्ञाप्रसादेन मू- अ०
२० र्खो वा यदि पण्डितः ॥ यस्तु संबुध्य- २
ते तत्त्वं विरक्तो भवसागरात् ॥ २३ ॥
रागद्वेषविनिर्मुक्तः सर्वभूतहिते रतः ॥
दृढबोधश्च धीरश्च स गच्छेत्परमं पद-
म् ॥ २४ ॥ घटे भिन्ने घटाकाश आ- २०
काशे लीयते यथा ॥ देहाभावे तथा

योगी स्वरूपे परमात्मनि ॥ २५ ॥ उ-
क्तेयं कर्मयुक्तानां मतिर्यान्तेऽपि सा ग-
तिः ॥ न चोक्ता योगयुक्तानां मतिर्या-
न्तेऽपि सा गतिः ॥२६॥ या गतिः क-
र्मयुक्तानां सा च वागिंद्रियाद्वदेत्॥यो-
गिनां या गतिः क्वापि ह्यकथ्या भवतो-
र्जिता॥२७॥एवं ज्ञात्वा त्वमुं मार्गं यो-

अव. २१ गिनां नैव कल्पितम् ॥ विकल्पवर्जनं अ० २
तेषां स्वयं सिद्धिः प्रवर्तते ॥२८॥ तीर्थे
वान्त्यजगेहे वा यत्र कुत्र मृतोऽपि वा॥
न योगी पश्यते गर्भं परे ब्रह्मणि लीयते
२९सहजमजमचिन्त्यं यस्तु पश्येत्स्व-
रूपं घटति यदि यथेष्टं लिप्यते नैव २१
दोषैः ॥ सकृदपि तदभावात्कर्म किंचि-

न्न कुर्यात्तदपि न च विवद्धः संयमी वा तपस्वी ॥ ३० ॥ निरामयं निष्प्रतिमं निराकृतिं निराश्रयं निर्वपुषं निराशिषम् ॥ निर्द्वन्द्वनिर्मोहमलुप्तशक्तिकं तमीशमात्मानमुपैति शाश्वतम् ॥३१॥ वेदो न दीक्षा न च मुण्डनक्रिया गुरुर्न शिष्यो न च यंत्रसंपदः ॥ मुद्रादि-

अव. कं चापि न यत्र भासते तमीशमात्मा- अ०
२२ नमुपैति शाश्वतम् ॥ ३२ ॥ न शांभ- २
वं शाक्तिकमानवं न वा पिण्डं च रूपं
च पदादिकं न वा ॥ आरम्भनिष्पत्ति-
घटादिकं च नो तमीशमात्मानमुपैति
शाश्वतम् ॥ ३३ ॥ यस्य स्वरूपात्स-
चराचरं जगदुत्पद्यते तिष्ठति लीयते- २२

ऽपि वा ॥ पयोविकारादिव फेनबुद्बुदा-
स्तमीशमात्मानमुपैति शाश्वतम् ३४
नासानिरोधो न च दृष्टिरासनं बोधो-
ऽप्यबोधोऽपि न यत्र भासते ॥ नाडी-
प्रचारोऽपि न यत्र किंचित्तमीशमा-
त्मानमुपैति शाश्वतम् ॥३५॥नानात्व-
मेकत्वमुभत्वमन्यता अणुत्वदीर्घत्व-

अव. २३ महत्त्वशून्यता ॥ मानत्वमेयत्वसमत्व- अ० २
वर्जितं तमीशमात्मानमुपैति शाश्व-
तम् ॥ ३६ ॥ सुसंयमी वा यदि वा न
संयमी सुसंग्रही वा यदि वा न संग्रही
॥ निष्कर्मको वा यदि वा सकर्मकस्त-
मीशमात्मानमुपैति शाश्वतम् ॥३७॥ २३
मनो न बुद्धिर्न शरीरमिन्द्रियं तन्मा-

त्रभूतानि न भूतपञ्चकम् ॥ अहंकृ-
तिश्चापि वियत्स्वरूपकं तमीशमा-
त्मानमुपैति शाश्वतम् ॥ ३८ ॥ विधौ
निरोधे परमात्मतां गते न योगिनश्चे-
तसि भेदवर्जिते ॥ शौचं न वा शौच-
मलिङ्गभावना सर्वं विधेयं यदि वा नि-
षिध्यते ॥ ३९ ॥ मनो वचो यत्र न श-

अव.
२४

क्रमीरितुं नूनं कथं तत्र गुरूपदेशता॥ अ० ३
इमां कथामुक्तवतो गुरोस्तद्युक्तस्य त-
त्त्वं हि समं प्रकाशते ॥ ४० ॥ ॥ इ-
ति श्रीदत्तात्रेयविरचितायामवधूत-
गीतायामात्मसंवित्त्युपदेशो नाम द्वि-
तीयोऽध्यायः ॥ २ ॥

अवधूत उवाच ॥ गुणविगुणवि- २४

भागो वर्तते नैव किंचिद्गतिविरतिवि-
हीनं निर्मलं निष्प्रपञ्चम् ॥ गुणविगु-
णविहीनं व्यापकं विश्वरूपं कथमह-
मिह वन्दे व्योमरूपं शिवं वै ॥१॥ श्वे-
तादिवर्णरहितो नियतं शिवश्च कार्यं
हि कारणमिदं हि परं शिवश्च ॥ एवं
विकल्परहितोऽहमलं शिवश्च स्वात्मा-

अव. नमात्मनि सुमित्र कथं नमामि ॥ २ ॥ अ०
२९ निर्मूलमूलरहितो हि सदोदितोऽहं नि- ३
र्धूमधूमरहितो हि सदोदितोऽहम् ॥
निर्दीपदीपरहितो हि सदोदितोऽहं
ज्ञानामृतं समरसं गगनोपमोऽहम् ३
निष्कामकाममिह नाम कथं वदामि २९
निःसंगसंगमिह नाम कथं वदामि ॥

निःसारसाररहितं च कथं वदामि ज्ञा-
नामृतं समरसं गगनोपमोऽहम् ॥ ४ ॥
अद्वैतरूपमखिलं हि कथं वदामि द्वैत-
स्वरूपमखिलं हि कथं वदामि ॥ नित्यं
त्वनित्यमखिलं हि कथं वदामि ज्ञाना-
मृतं समर० ॥५॥ स्थूलं हि नो नहि
कृशं न गतागतं हि आद्यन्तमध्यरहि-

अव. २६ तं न परापरं हि ॥ सत्यं वदामि खलु वै अ० ३
परमार्थतत्त्वं ज्ञानामृतं० ॥ ६ ॥ संवि-
द्धि सर्वकरणानि नभोनिभानि संविद्धि
सर्वविषयाश्च नभोनिभाश्च ॥ संविद्धि
चैकममलं न हि बन्धमुक्तं ज्ञानामृतं
समरसं० ॥ ७ ॥ दुर्बोधबोधगहनो
न भवामि तात दुर्लक्ष्यलक्ष्यगहनो न २६

भवामि तात ॥ आसन्नरूपगहनो न
भवामि तात ज्ञानामृतं० ॥ ८ ॥ नि-
ष्कर्मकर्मदहनो ज्वलनो भवामि निर्दुः-
खदुःखदहनो ज्वलनो भवामि ॥ निर्दे-
हदेहदहनो ज्वलनो भवामि ज्ञानामृ-
तं० ॥ ९ ॥ निष्पापपापदहनो हि हु-
ताशनोऽहं निर्धर्मधर्मदहनो हि हुता-

अव. शनोऽहम् ॥ निर्बन्धबन्धदहनो हि हु- अ०
२७ ताशनोऽहं ज्ञानामृतं० ॥ १० ॥ नि- ३
र्भावभावरहितो न भवामि वत्स निर्यो-
गयोगरहितो न भवामि वत्स ॥ नि-
श्चित्तचित्तरहितो न भवामि वत्स ज्ञा-
नामृतं० ॥ ११ ॥ निर्मोहमोहपदवीति २७
न मे विकल्पो निःशोकशोकपदवीति

न मे विकल्पः ॥ निर्लोभलोभपदवीति
न मे विकल्पो ज्ञानामृतं० ॥ १२ ॥
संसारसंततिलता न च मे कदाचित्सं-
तोषसंततिसुखे न च मे कदाचित् ॥
अज्ञानबन्धनमिदं न च मे कदाचि-
ज्ज्ञानामृतं०॥१३॥ संसारसंततिरजो
न च मे विकारः संतापसंततितमो न

अव. च मे विकारः ॥ सत्वं स्वधर्मजनकं न अ०
२८ च मे विकारो ज्ञानामृतं० ॥१४॥ सं- ३
तापदुःखजनको न विधिः कदाचित्
संतापयोगजनितं न मनः कदाचित्
॥ यस्मादहंकृतिरियं न च मे कदा-
चिज्ज्ञानामृतं० ॥ १५ ॥ निष्कम्प- २८
कम्पनिधनं न विकल्पकल्पं स्वप्नप्रबो-

धनिधनं न हिताहितं हि॥ निःसारसा-
रनिधनं न चराचरं हि ज्ञानामृतं०
॥ १६ ॥ नो वेद्यवेदकमिदं न च हेतु-
तर्क्यं वाचामगोचरमिदं न मनो न
बुद्धिः ॥ एवं कथं हि भवतः कथयामि
तत्त्वं ज्ञानामृतं० ॥ १७ ॥ निर्भिन्नभि-
न्नरहितं परमार्थतत्त्वमन्तर्बहिर्न हि

अव. कथं परमार्थतत्त्वम् ॥ प्राक्संभवं न च अ०
२९ रतं नहि वस्तु किञ्चिज्ज्ञानामृतं स० ३
॥ १८ ॥ रागादिदोषरहितं त्वहमेव त-
त्त्वं दैवादिदोषरहितं त्वहमेव तत्त्वम् ॥
संसारशोकरहितं त्वहमेव तत्त्वं ज्ञाना-
मृतं० ॥ १९ ॥ स्थानत्रयं यदि च ने- २९
ति कथं तुरीयं कालत्रयं यदि च नेति

कथं दिशश्च ॥ शान्तं पदं हि परमं
परमार्थतत्त्वं ज्ञानामृतं० ॥ २० ॥ दी-
र्घो लघुः पुनरितीह न मे विभागो वि-
स्तारसंकटमितीह न मे विभागः ॥
कोणं हि वर्तुलमितीह न मे विभागो
ज्ञानामृतं० ॥ २१ ॥ मातापितादि त-
नयादि न मे कदाचिज्जातं मृतं न च

मनो न च मे कदाचित् ॥ निर्व्याकुलं
स्थिरमिदं परमार्थतत्त्वं ज्ञानामृतं० ॥
॥ २२ ॥ शुद्धं विशुद्धमविचारमनन्त-
रूपं निर्लेपलेपमविचारमनन्तरूपम्॥
निःखण्डखण्डमविचारमनन्तरूपं ज्ञा-
नामृतं० ॥ २३ ॥ ब्रह्मादयः सुरगणाः ३०
कथमत्र संति स्वर्गादयो वसतयः क-

थमत्र संति ॥ यद्येकरूपममलं परमा-
र्थतत्त्वं ज्ञानामृतं० ॥ २४ ॥ निर्नेति
नेति विमलो हि कथं वदामि निःशेष-
शेषविमलो हि कथं वदामि ॥ निर्लि-
ङ्गलिङ्गविमलो हि कथं वदामि ज्ञाना-
मृतं० ॥ २५ ॥ निष्कर्मकर्मपरमं स-
ततं करोमि निःसंगसंगरहितं परमं

अव. ३१ विनोदम् ॥ निर्देहदेहरहितं सततं वि- अ० ३
नोदं ज्ञानामृतं० ॥ २६ ॥ माया प्रप-
ञ्चरचना न च मे विकारो कौटिल्यद-
म्भरचना न च मे विकारः ॥ सत्यानृ-
तेति रचना न च मे विकारो ज्ञानामृ-
तं० ॥२७॥ संध्यादिकालरहितं न च ३१
मे वियोगो ह्यन्तःप्रबोधरहितं बधिरो

न मूकः ॥ एवं विकल्परहितं न च भा-
वशुद्धं ज्ञानामृतं० ॥ २८ ॥ निर्नाथ-
नाथरहितं हि निराकुलं वै निश्चित्तचि-
त्तविगतं हि निराकुलं वै ॥ संविद्धि
सर्वविगतं हि निराकुलं वै ज्ञानामृतं०
॥ २९ ॥ कान्तारमन्दिरमिदं हि कथं
वदामि संसिद्धसंशयमिदं हि कथं व-

दामि ॥ एवं निरन्तरसमं हि निराकुलं
वै ज्ञानमृतं० ॥ ३० ॥ निर्जीवजीवर-
हितं सततं विभाति निर्बीजबीजरहितं
सततं विभाति ॥ निर्वाणबन्धरहितं
सततं विभाति ज्ञानामृतं समरसं०
॥ ३१ ॥ संभूतिवर्जितमिदं सततं वि-
भाति संसारवर्जितमिदं सततं विभा-

ति ॥ संहारवर्जितमिदं सततं विभाति ज्ञानामृतं० ॥ ३२ ॥ उल्लेखमात्रमपि ते न च नामरूपं निर्भिन्नभिन्नमपि ते न हि वस्तु किंचित् ॥ निर्लज्ज मानस करोषि कथं विषादं ज्ञानामृतं० ॥ ३३॥ किं नाम रोदिषि सखे न जरा न मृत्युः किं नाम रोदिषि सखे न च

अव. ३३ जन्मदुःखम् ॥ किं नाम रोदिषि सखे अ० ३
न च ते विकारो ज्ञानामृ० ॥३४॥ किं
नाम रोदिषि सखे न च ते स्वरूपं किं
नाम रोदिषि सखे न च ते विरूपम् ॥
किं नाम रोदिषि सखे न च ते वयांसि
ज्ञानामृ० ॥ ३५ ॥ किं नाम रोदिषि ३३
सखे न च ते वयांसि किं नाम रोदिषि

सखे न च ते मनांसि ॥ किं नाम रोदि-
षि सखे न तवेन्द्रियाणि ज्ञानामृतं०॥
॥३६॥किं नाम रोदिषि सखे न च ते-
ऽस्ति कामः किं नाम रोदिषि सखे न च
ते प्रलोभः ॥ किं नाम रोदिषि सखे न
च ते विमोहो ज्ञानामृतं०॥३७॥ऐश्व-
र्यमिच्छसि कथं न च ते धनानि ऐश्व-

अव. ३४ र्यमिच्छसि कथं न च ते हि पत्नी ॥ अ० ३
ऐश्वर्यमिच्छसि कथं न च ते ममेति
ज्ञानामृ० ॥ ३८ ॥ लिङ्गप्रपञ्चजनुषी
न च ते न मे च निर्लज्जमानसमि-
दं च विभाति भिन्नम् ॥ निर्भेदभेदर-
हितं न च ते न मे च ज्ञानामृतं०॥ ३४
॥ ३९ ॥ नो थाणुमात्रमपि ते हि वि-

रागरूपं नो वाणुमात्रमपि ते हि सरा-
गरूपम् ॥ नो वाणुमात्रमपि ते हि स-
कामरूपं ज्ञाना० ॥ ४० ॥ ध्याता न
ते हि हृदये न च ते समाधिर्ध्यानं न
ते हि हृदये न बहिःप्रदेशः ॥ ध्येयं न
चेति हृदये नहि वस्तुकालो ज्ञाना०
॥ ४१ ॥ यत्सारभूतमखिलं कथितं

मया ते न त्वं न मे न महतो न गुरुर्न
शिष्यः ॥ स्वच्छन्दरूपसहजं परमा-
र्थतत्त्वं ज्ञानामृ० ॥ ४२ ॥ कथमिह
परमार्थं तत्त्वमानन्दरूपं कथमिह प-
रमार्थं नैवमानन्दरूपम् ॥ कथमिह
परमार्थं ज्ञानविज्ञानरूपं यदि परमह-
मेकं वर्तते व्योमरूपम् ॥ ४३ ॥ दहन-

पवनहीनं विद्धि विज्ञानमेकमवनिज-
लविहीनं विद्धि विज्ञानरूपम् ॥ सम-
गमनविहीनं विद्धि विज्ञानमेकं गगन-
मिव विशालं विद्धि विज्ञानमेकम् ॥
॥४४॥ न शून्यरूपं न विशून्यरूपं न
शुद्धरूपं न विशुद्धरूपम् ॥ रूपं विरू-
पं न भवामि किंचित्स्वरूपरूपं पर-

अव. ३६ मार्थतत्त्वम् ॥ ४५ ॥ मुञ्च मुञ्च हि अ० ४
संसारं त्यागं मुञ्च हि सर्वथा ॥ त्या-
गात्त्यागविषं शुद्धममृतं सहजं ध्रुवम्
॥ ४६ ॥ इति श्रीदत्तात्रेयविरचिता-
यामवधूतगीतायामात्मसंवित्त्युपदेशो
नाम तृतीयोऽध्यायः ॥ ३ ॥
श्रीदत्त उवाच ॥ ॥ नावाहनं नैव ३६

विसर्जनं वा पुष्पाणि पत्राणि कथं भव
न्ति ॥ ध्यानानि मन्त्राणि कथं भवन्ति
समासमं चैव शिवार्चनं च ॥ १ ॥ न
केवलं बन्धविबन्धमुक्तो न केवलं शु-
द्धविशुद्धमुक्तः ॥ न केवलं योगवियोग-
मुक्तः स वै विमुक्तो गगनोपमोऽहम्
॥२॥संजायते सर्वमिदं हि तथ्यं संजा-

यते सर्वमिदं वितथ्यम्॥ एवं विकल्पो
मम नैव जातः स्वरूपनिर्वाणमनाम-
योऽहम् ॥३॥ न साञ्जनं चैव निरञ्जनं
वा न चान्तरं वापि निरन्तरं वा ॥
अन्तर्विभिन्नं नहि मे विभाति स्वरूप-
निर्वाणमनामयोऽहम् ॥४॥ अबोधबो-
धो मम नैव जातो बोधस्वरूपं मम नै-

व जातम् ॥ निर्बोधवोधं च कथं वदामि स्वरूपनिर्वाणमनामयोऽहम् ॥५॥ न धर्मयुक्तो न च पापयुक्तो न वन्धयुक्तो न च मोक्षयुक्तः ॥ युक्तं त्वयुक्तं न च मे विभाति स्वरूप० ॥६॥ परापरं वा न च मे कदाचिन्मध्यस्थभावो हि न चारिमित्रम् ॥ हिताहितं चा-

अव. ३८ पि कथं वदामि स्व० ॥ ७ ॥ नोपास- अ० ४
को नैवमुपास्यरूपं न चोपदेशो न च
मे क्रिया च ॥ संवित्स्वरूपं च कथं व-
दामि स्व० ॥ ८ ॥ नो व्यापकं व्याप्य-
मिहास्ति किंचिन्न चालयं वापि निरा-
लयं वा ॥ अशून्यशून्यं च कथं वदा- ३८
मि स्वरूप० ॥ ९ ॥ न ग्राहको ग्राह्य-

कमेव किंचिन्न कारणं वा मम नैव का-
र्यम् ॥ अचिन्त्यचिन्त्यं च कथं वदामि
स्वरूप० ॥ १० ॥ न भेदकं वापि न
चैव भेद्यं न वेदकं वा मम नैव वेद्यम्॥
गतागतं तात कथं वदामि स्वरूपनि०
॥११॥न चास्ति देहो न च मे विदेहो
बुद्धिर्मनो मे न हि चेंद्रियाणि ॥ रागो

अव. ३९ विरागश्च कथं वदामि स्वरूप०॥१२॥ अ० ४
उल्लेखमात्रं नहि भिन्नमुच्चैरुल्लेखमात्रं
न तिरोहितं वै ॥ समासमं मित्र कथं
वदामि स्वरूप० ॥ १३ ॥ जितेन्द्रि-
योऽहं त्वजितेन्द्रियो वा न संयमो मे
नियमो न जातः॥जयाजयौ मित्र क- ३९
थं वदामि स्वरूप० ॥ १४ ॥ अमूर्त-

मूर्तिर्न च मे कदाचिदाद्यन्तमध्यं न च
मे कदाचित् ॥ बलाबलं मित्र कथं व-
दामि स्वरूप० ॥१५॥ मृतामृतं वापि
विषाविषं च संजायते तात न मे क-
दाचित् ॥ अशुद्धशुद्धं च कथं वदामि
स्वरूप० ॥ १६ ॥ स्वप्नः प्रबोधो न च
योगमुद्रा नक्तं दिवा वापि न मे कदा-

अव. ४० चित् ॥ अतुर्यंतुर्यं च कथं वदामि अ० ४
स्वरूप० ॥ १७ ॥ संविद्धि मां सर्ववि-
सर्वमुक्तं माया विमाया न च मे कदा-
चित् ॥ संध्यादिकं कर्म कथं वदामि
स्वरूप० ॥ १८ ॥ संविद्धि मां सर्वस-
माधियुक्तं संविद्धि मां लक्ष्यविलक्ष्यमु- ४०
क्तम् ॥ योगं वियोगं च कथं वदामि

स्वरूप० ॥ १९ ॥ मूर्खोऽपि नाहं न
च पण्डितोऽहं मौनं विमौनं न च मे
कदाचित् ॥ तर्कं वितर्कं च कथं वदा-
मि स्वरूप० ॥ २० ॥ पिता च माता
च कुलं न जातिर्जन्मादिमृत्युर्न च
मे कदाचित् ॥ स्नेहं विमोहं च कथं व-
दामि स्वरूप० ॥२१॥ अस्तं गतो नै-

अव. व सदोदितोऽहं तेजो वितेजो न च मे अ०
४१ कदाचित् ॥ संध्यादिकं कर्म कथं व- ४
दामि स्वरूप० ॥२२॥ असंशयं विद्धि
निराकुलं मामसंशयं विद्धि निरन्तरं
माम् ॥ असंशयं विद्धि निरञ्जनं मां
स्वरूप० ॥ २३ ॥ ध्यानानि सर्वाणि ४१
परित्यजन्ति शुभाशुभं कर्म परित्य-

जन्ति ॥ त्यागामृतं तात पिबन्ति धीराः स्वरूप० ॥ २४ ॥ विन्दति विन्दति नहि नहि यत्र छन्दोलक्षणं नहि नहि तत्र ॥ समरसमग्नो भावितपूतः प्रलपति तत्त्वं परमवधूतः ॥२५॥ इति श्रीदत्तात्रेयविरचितायामवधूतगीतायां स्वामिकार्तिकसंवादे स्वात्म-

अव. संवित्त्युपदेशो स्वरूपनिर्णयो नाम च- अ०
४२ तुर्थोऽध्यायः ॥ ४ ॥
श्रीदत्त उवाच ॥ ॐमिति गदितं
गगनसमं तन्न परापरसारविचार इ-
ति ॥ अविलासविलासनिराकरणं क-
थमक्षरबिन्दुसमुच्चरणम् ॥ १ ॥ इति
तत्त्वमसिप्रभृतिश्रुतिभिः प्रतिपादि- ४२

तमात्मनि तत्त्वमसि ॥ त्वमुपाधिविव-
र्जितसर्वसमं किमु रोदिषि मानसि स-
र्वसमम् ॥ २ ॥ अधऊर्ध्वविवर्जितस-
र्वसमं बहिरन्तरवर्जितसर्वसमम् ॥
यदि चैकविवर्जितसर्वसमं किमु रोदि-
षि मानसि सर्वसमम् ॥ ३ ॥ नहि क-
ल्पितकल्पविचार इति नहि कारण-

अव. कार्यविचार इति ॥ पदसंधिविवर्जि- अ०
४३ तसर्वसमं किमु० ॥ ४ ॥ नहि बोध- ८
विबोधसमाधिरिति नहि देशविदेश-
समाधिरिति ॥ नहि कालविकालसमा-
धिरिति किमु० ॥ ५ ॥ नहि कुंभनभो
नहि कुंभ इति नहि जीववपुर्नहि जी- ४३
व इति ॥ नहि कारणकार्यविभाग इति

किमु० ॥ ६ ॥ इह सर्वनिरन्तरमोक्ष-
पदं लघुदीर्घविचारविहीन इति॥ नहि
वर्तुलकोणविभाग इति किमु रोदि० ॥
॥ ७ ॥ इह शून्यविशून्यविहीन इति
इह शुद्धविशुद्धविहीन इति ॥ इह स-
र्वविसर्वविहीन इति किमु० ॥८॥ नहि
भिन्नविभिन्नविचार इति बहिरन्तर-

 संधिविचार इति ॥ अरिमित्रविवर्जि-
तसर्वसमं किमु० ॥९॥ नहि शिष्य-
विशिष्यसरूप इति न चराचरभेदवि-
चार इति ॥ इह सर्वनिरन्तरमोक्षपदं
किमु० ॥ १० ॥ ननु रूपविरूपविही-
न इति ननु भिन्नविभिन्नविहीन इति
॥ ननु सर्गविसर्गविहीन इति किमु०

॥ ११ ॥ न गुणागुणपाशनिबन्ध इति
मृतजीवनकर्म करोमि कथम् ॥ इति
शुद्धनिरञ्जनसर्वसमं किमु० ॥ १२॥
इह भावविभावविहीन इति इह काम-
विकामविहीन इति ॥ इह बोधतमं ख-
लु मोक्षसमं किमु० ॥ १३ ॥ इह त-
त्त्वनिरन्तरतत्त्वमिति नहि संधिविसं-

धिविहीन इति ॥ यदि सर्वविवर्जितस-
र्वसमं किमु०॥१४॥अनिकेतकुटीपरि-
वारसमं इह संगविसंगविहीनपरम् ॥
इह बोधविबोधविहीनपरं किमु० १५
अविकारविकारमसत्यमिति अविल-
क्षविलक्षमसत्यमिति ॥ यदि केवलमा-
त्मनि सत्यमिति किमु० ॥ १६ ॥ इह

सर्वतमं खलु जीव इति इह सर्वनिर-
न्तरजीव इति ॥ इह केवलनिश्चल-
जीव इति किमु० ॥ १७ ॥ अविवेक-
विवेकमबोध इति अविकल्पविकल्प-
मबोध इति ॥ यदि चैकनिरन्तरबोध
इति किमु० ॥ १८ ॥ नहि मोक्षपदं
नहि बन्धपदं नहि पुण्यपदं नहि पा-

अव. पपदम् ॥ नहि पूर्णपदं नहि रिक्तपदं अ०
४६ किमु० ॥ १९ ॥ यदि वर्णविवर्णविही- ८
नसमं यदि कारणकार्यविहीनसमम् ॥
यदि भेदविभेदविहीनसमं किमु०२०
इह सर्वनिरन्तरसर्वचिते इह केवल-
निश्चलसर्वचिते ॥ द्विपदादिविवर्जि- ४६
तसर्वचिते कि० ॥२१॥ अतिसर्वनि-

रन्तरसर्वगतं रतिनिर्मलनिश्चलसर्वगतम् ॥ दिनरात्रिविवर्जितसर्वगतं किमु० ॥ २२ ॥ नहि बन्धविबन्धसमागमनं नहि योगवियोगसमागमनम् ॥ नहि तर्कवितर्कसमागमनं किमु रोदि० ॥ २३ ॥ इह कालविकालनिराकरणमणुमात्रकृशानुनिराकरणम् ॥

नहि केवलसत्यनिराकरणं किमु रो०
॥२४॥ इह देहविदेहविहीन इति न-
नु स्वप्नसुषुप्तिविहीनपरम्॥ अभिधा-
नविधानविहीनपरं किमु० ॥२५॥ ग-
गनोपमशुद्धविशालसमं अविसर्वविवि-
वर्जितसर्वसमम्॥ गतसारविसारवि-
कारसमं किमु० ॥२६॥ इह धर्मविधर्म-

विरागतरं इह वस्तुविवस्तुविरागतर-
म् ॥ इह कामविकामविरागतरं किमु०
॥ २७॥ सुखदुःखविवर्जितसर्वसममि-
ह शोकविशोकविहीनपरम् ॥ गुरुशि-
ष्यविवर्जिततत्त्वपरं किमु० ॥ २८ ॥ न
किलांकुरसारविसार इति न चलाचल-
साम्यविसाम्यमिति ॥ अविचारवि-

चारविहीनमिति किमु० ॥ २९ ॥ इह
सारसमुच्चयसारमिति कथितं निज-
भावविभेद इति ॥ विषये करणत्वमस-
त्यमिति किमु० ॥ ३० ॥ बहुधा श्रुत-
यः प्रवदन्ति यतो वियदादिरिदं मृ-
गतोयसमम् ॥ यदि चैकनिरन्तरसर्व-
समं किमु० ॥ ३१ ॥ विन्दति विन्दति

नहि नहि यत्र छन्दोलक्षणं नहि नहि तत्र ॥ समरसमग्नो भावितपूतः प्रलपति तत्त्वं परमवधूतः ॥ ३२ ॥ इति श्रीदत्तात्रेयविरचितायामवधूतगीतायां स्वामिकार्तिकसंवादे आत्मसंवित्त्युपदेशे शमदृष्टिकथनं नाम पञ्चमोऽध्यायः ॥ ५ ॥

अव. ४९

श्रीदत्त उवाच ॥ वहुधा श्रुतयः प्रवदन्ति वयं वियदादिरिदं मृगतोय-समम् ॥ यदि चैकनिरन्तरसर्वशिवमु-पमेयमथो ह्युपमा च कथम् ॥१॥ अवि-भक्तिविभक्तिविहीनपरं ननु कार्यवि-कार्यविहीनपरम् ॥ यदि चैकनिरन्तर-सर्वशिवं यजनं च कथं तपनं च कथम्

।२। मन एव निरन्तरसर्वगतं ह्यविशा-
लविशालविहीनपरम् ॥ मन एव नि-
रन्तरसर्वशिवं मनसापि कथं वचसा
च कथम् ॥ ३ ॥ दिनरात्रिविभेदनिरा-
करणमुदितानुदितस्य निराकरणम् ॥
यदि चैकनिरन्तरसर्वशिवं रविचन्द्र-
मसौ ज्वलनश्च कथम् ॥ ४ ॥ गतकाम-

अव. ५०

विकामविभेद इति गतचेष्टविचेष्टवि-
भेद इति ॥ यदि चैकनिरन्तरसर्वशिवं
बहिरन्तरभिन्नमतिश्च कथम् ॥ ५ ॥
यदि सारविसारविहीन इति यदि शू-
न्यविशून्यविहीन इति ॥ यदि चैकनि-
रन्तरसर्वशिवं प्रथमं च कथं चरमं च
कथम् ॥ ६ ॥ यदि भेदविभेदनिराक-

रणं यदि वेदकवेद्यनिराकरणम् ॥ यदि
चैकनिरन्तरसर्वशिवं तृतीयं च कथं
तुरीयं च कथम् ॥ ७ ॥ गदितागदितं
नहि सत्यमिति विदिताविदितं नहि
सत्यमिति॥यदि चैकनिरन्तरसर्वशिवं
विषयेन्द्रियबुद्धिमनांसि कथम् ॥ ८ ॥
गगनं पवनो नहि सत्यमिति धरणी

अव. ५१ दहनो नहि सत्यमिति ॥ यदि चैकनि- अ० ६
रन्तरसर्वशिवं जलदश्च कथं सलिलं
च कथम् ॥ ९ ॥ यदि कल्पितलोकनि-
राकरणं यदि कल्पितदेवनिराकरणम्
॥ यदि चैकनिरन्तरसर्वशिवं गुणदो-
षविचारमतिश्च कथम् ॥ १० ॥ मर- ५१
णामरणं हि निराकरणं करणाकरणं हि

निराकरणम् ॥ यदि चैकनिरन्तरसर्व-
शिवं गमनागमनं हि कथं वदति
॥ ११ ॥ प्रकृतिः पुरुषो नहि भेद इति
नहि कारणकार्यविभेद इति ॥ यदि
चैकनिरन्तरसर्वशिवं पुरुषापुरुषं च
कथं वदति ॥ १२ ॥ तृतीयं नहि दुःख-
समागमनं न गुणाद्द्वितीयस्य समाग-

मनम् ॥ यदि चैकनिरन्तरसर्वशिवं
स्थविरश्च युवा च शिशुश्च कथम् १३
ननु आश्रमवर्णविहीनपरं ननु कारण-
कर्तृविहीनपरम् ॥ यदि चैकनिरन्तर-
सर्वशिवमविनष्टविनष्टमतिश्च कथम्
॥ १४ ॥ ग्रसिताग्रसितं च वितथ्य-
मिति जनिताजनितं च वितथ्यमिति

॥ यदि चैकनिरन्तरसर्वशिवमविना-
शि विनाशि कथं हि भवेत् ॥ १५ ॥
पुरुषापुरुषस्य विनष्टमिति वनिताव-
नितस्य विनष्टमिति ॥ यदि चैकनिर-
न्तरसर्वशिवमविनोदविनोदमतिश्च
कथम् ॥ १६ ॥ यदि मोहविषादवि-
हीनपरो यदि संशयशोकविहीनपरः॥

यदि चैकनिरन्तरसर्वशिवमहमेति म-
मेति कथं च पुनः ॥ १७ ॥ ननु धर्म-
विधर्मविनाश इति ननु वन्धविबन्ध-
विनाश इति ॥ यदि चैकनिरन्तरस-
र्वशिवमिह दुःखविदुःखमतिश्च कथम्
॥१८॥नहि याज्ञिकयज्ञविभाग इति न
हुताशनवस्तुविभाग इति॥ यदि चैक-

निरन्तरसर्वशिवं वद कर्मफलानि भव-
न्ति कथम्॥१९॥ननु शोकविशोकवि-
मुक्त इति ननु दर्पविदर्पविमुक्त इति॥
यदि चैकनिरन्तरसर्वशिवं ननु राग-
विरागमतिश्च कथम्॥२०॥ नहि मो-
हविमोहविकार इति नहि लोभविलो-
भविकार इति॥ यदि चैकनिरन्तरस-

वैशिवं ह्यविवेकविवेकमतिश्च कथम्
॥ २१ ॥ त्वमहं नहि हंत कदाचिदपि
कुलजातिविचारमसत्यमिति ॥ अह-
मेव शिवः परमार्थ इति अभिवादन-
मत्र करोमि कथम् ॥ २२ ॥ गुरुशि-
ष्यविचारविशीर्ण इति उपदेशविचा-
रविशीर्ण इति ॥ अहमेव शिवः पर-

मार्थं इति अभिवादनमत्र करोमि क-
थम् ॥ २३ ॥ नहि कल्पितदेहविभा-
ग इति नहि कल्पितलोकविभाग इति
॥ अहमेव शिवः परमार्थं इति अभि-
वादनमत्र करोमि कथम् ॥ २४ ॥ स-
रजो विरजो न कदाचिदपि ननु नि-
र्मलनिश्चलशुद्ध इति ॥ अहमेव शिवः

अव. परमार्थ इति अभिवादनमत्र करोमि अ०
५५ कथम् ॥ २५ ॥ नहि देहविदेहविक- ६
ल्प इति अनृतं चरितं नहि सत्यमि-
ति॥अहमेव शिवः परमार्थ इति अभि-
वादनमत्र करोमि कथम् ॥२६॥ वि-
न्दति विन्दाति नहि नहि यत्र छन्दो- ५५
लक्षणं नहि नहि तत्र ॥ समरसमग्नो

भावितपूतः प्रलपति तत्त्वं परमवधू-
तः ॥ २७ ॥ ॥ इति श्रीदत्तात्रेयवि-
रचितायामवधूतगीतायां स्वामिका-
र्तिकसंवादे स्वात्मसंवित्त्युपदेशे मो-
क्षनिर्णयो नाम षष्ठोऽध्यायः ॥ ६ ॥
श्रीदत्त उवाच ॥ रथ्याकर्पटविर-
चितकन्थः पुण्यापुण्यविवर्जितपन्थः ॥

अव. ५६ शून्यागारे तिष्ठति नग्नो शुद्धनिरञ्जन- अ० ७
समरसमग्नः ॥ १ ॥ लक्षालक्षविवर्जि-
तलक्ष्यो युक्तायुक्तविवर्जितदक्षः ॥ के-
वलतत्त्वनिरञ्जनपूतो वादविवादः क-
थमवधूतः ॥ २ ॥ आशापाशवि-
बन्धनमुक्तः शौचाचारविवर्जितयु- ५६
क्तः ॥ एवं सर्वविवर्जितसंतस्तत्त्वं

शुद्धनिरञ्जनवन्तः ॥ ३ ॥ कथमिह दे-
हविदेहविचारः कथमिह रागविराग-
विचारः ॥ निर्मलनिश्चलगगनाकारं
स्वयमिह तत्त्वं सहजाकारम् ॥ ४ ॥
कथमिह तत्त्वं विन्दति यत्र रूपमरू-
पं कथमिह तत्र ॥ गगनाकारः परमो
यत्र विषयीकरणं कथमिह तत्र॥५॥ग-

अव. ५७ गनाकारनिरन्तरहंसस्तत्त्वविशुद्धनि- अ० ७
रञ्जनहंसः ॥ एवं कथमिह भिन्नविभि-
न्नं बन्धविबन्धविकारविभिन्नम् ॥ ६ ॥
केवलतत्त्वनिरन्तरसर्वं योगवियोगौ
कथमिह गर्वम् ॥ एवं परमनिरन्तरसर्वं
एवं कथमिह सारविसारम् ॥ ७ ॥ के- ५७
वलतत्त्वनिरञ्जनसर्वं गगनाकारनिर-

न्तरशुद्धम् ॥ एवं कथमिह संगविसंगं सत्यं कथमिह रङ्गविरङ्गम् ॥८॥ योगवियोगै रहितो योगी भोगविभोगै रहितो भोगी॥ एवं चरति हि मन्दंमन्दं मनसा कल्पितसहजानन्दम् ॥९॥ बोधविबोधैः सततं युक्तो द्वैताद्वैतैः कथमिह मुक्तः ॥ सहजो विरजः कथमि-

अव.: ह योगी शुद्धनिरञ्जनसमरसभोगी अ०
५८ ॥ १० ॥ भग्नाभग्नविवर्जितभग्नो लग्ना- ७
लग्नविवर्जितलग्नः ॥ एवं कथमिह सा-
रविसारः समरसतत्त्वं गगनाकारः ॥
॥११॥ सततं सर्वविवर्जितयुक्तः सर्वं
तत्त्वविवर्जितमुक्तः ॥ एवं कथमिह जी-
वितमरणं ध्यानाध्यानैः कथमिह कर- ५८

णम् ॥ १२ ॥ इन्द्रजालमिदं सर्वं यथा
मरुमरीचिका ॥ अखण्डितमनाकारो
वर्तते केवलः शिवः ॥१३॥ धर्मादौ मो-
क्षपर्यन्तं निरीहाः सर्वथा वयम् ॥ कथं
रागविरागैश्च कल्पयन्ति विपश्चितः
॥१४॥ विन्दति विन्दति नहि नहि य-
त्र छन्दोलक्षणं नहि नहि तत्र ॥ सम-

अव. ५९ रसमग्नो भावितपूतः प्रलपति तत्त्वं प- अ० ८
रमवधूतः ॥१५॥ इति श्रीदत्तात्रेयवि-
रचितायाम० स्वामिकार्तिकसं० स्वा-
त्मसंवित्युपदेशे सप्तमोऽध्यायः ॥७॥
श्रीदत्त उवाच ॥ त्वद्यात्रया व्याप-
कता हता ते ध्यानेन चेतःपरता हता
ते ॥ स्तुत्या मया वाक्परता हता ते ५९

क्षमस्व नित्यं त्रिविधापराधान् ॥ १ ॥
कामैरहतधीर्दान्तो मृदुः शुचिरकिंच-
नः ॥ अनीहो मितभुक् शान्तःस्थिरो
मच्छरणो मुनिः ॥ २ ॥ अप्रमत्तो ग-
भीरात्मा धृतिमान् जितषड्गुणः॥अ-
मानी मानदः कल्पो मैत्रः कारुणिकः
कविः ॥३॥ कृपालुरकृतद्रोहस्तितिक्षुः

सर्वदेहिनाम् ॥ सत्यसारोऽनवद्यात्मा
समः सर्वोपकारकः ॥ ४ ॥ अवधूत-
लक्षणं वर्णैर्ज्ञातव्यं भगवत्तमैः ॥ वेद-
वर्णार्थतत्त्वज्ञैर्वेदवेदान्तवादिभिः ॥५॥
आशापाशविनिर्मुक्त आदिमध्यान्त-
निर्मलः ॥ आनन्दे वर्तते नित्यमका-
रं तस्य लक्षणम् ॥ ६ ॥ वासनाव-

र्जिता येन वक्तव्यं च निरामयम् ॥
वर्तमानेषु वर्तेत वकारं तस्य लक्षण-
म् ॥ ७ ॥ धूलिधूसरगात्राणि धूत-
चित्तो निरामयः ॥ धारणाध्यान-
निर्मुक्तो धूकारस्तस्य लक्षणम् ॥ ८ ॥
तत्त्वचिंता धृता येन चिंताचेष्टाविव-
र्जितः ॥ तमोहंकारनिर्मुक्तस्तकारस्त-

 स्य लक्षणम् ॥ ९ ॥ आत्मानं चामृतं
हित्वा अभिन्नं मोक्षमव्ययम् ॥ गतो
हि कुत्सितः काको वर्तते नरकं प्रति
॥ १० ॥ मनसा कर्मणा वाचा त्यज्य-
तां मृगलोचने ॥ न ते स्वर्गोऽपवर्गो
वा सानन्दं हृदयं यदि ॥ ११ ॥ न
जानामि कथं तेन निर्मिता मृगलोच-

ना ॥ विश्वासघातकीं विद्धि स्वर्गमो-
क्षसुखार्गलाम् ॥ १२ ॥ मूत्रशोणित-
दुर्गन्धे ह्यमेध्यद्वारदूषिते ॥ चर्मकुण्डे
ये रमन्ति ते लिप्यन्ते न संशयः ॥
॥ १३ ॥ कौटिल्यदम्भसंयुक्ता सत्य-
शौचविवर्जिता ॥ केनापि निर्मिता
नारी बन्धनं सर्वदेहिनाम् ॥ १४ ॥

अव. त्रैलोक्यजननी धात्री सा भगी नरको अ०
६२ ध्रुवम् ॥ तस्यां जातो रतस्तत्र हाहा ८
संसारसंस्थितिः ॥ १५ ॥ जानामि
नरकं नारीं ध्रुवं जानामि बन्धनम् ॥
यस्यां जातो रतस्तत्र पुनस्तत्रैव धा-
वति ॥ १६ ॥ भगादिकुचपर्यन्तं सं- ६२
विद्धि नरकार्णवम् ॥ ये रमन्ति पुन-

स्तत्र तरन्ति नरकं कथम् ॥ १७ ॥
विष्ठादिनरकं घोरं भगं च परिनिर्मि-
तम् ॥ किमु पश्यसि रे चित्त कथं त-
त्रैव धावसि ॥ १८ ॥ भगेन चर्मकु-
ण्डेन दुर्गन्धेन व्रणेन च ॥ खण्डितं
हि जगत्सर्वं सदेवासुरमानुषम् ॥ १९ ॥
देहार्णवे महाघोरे पूरितं चैव शोणि-

तम् ॥ केनापि निर्मिता नारी भगं चै-
व अधोमुखम् ॥ २० ॥ अन्तरे नरकं
विद्धि कौटिल्यं बाह्यमण्डितम् ॥ ल-
लितामिह पश्यन्ति महामन्त्रविरोधि-
नीम् ॥ २१ ॥ अज्ञात्वा जीवितं ल-
ब्धं भवस्तत्रैव देहिनाम् ॥ अहो जा-
तो रतस्तत्र अहो भवविडम्बना ॥

॥२२॥तत्र मुग्धा रमन्ते च सदेवासु-
रमानवाः ॥ ते यान्ति नरकं घोरं स-
त्यमेव न संशयः ॥ २३ ॥ अग्निकुण्ड-
समा नारी घृतकुम्भसमो नरः ॥ सं-
सर्गेण विलीयेत तस्मात्तां परिवर्जये-
त् ॥ २४ ॥ गौडी माध्वी तथा पैष्टी
विज्ञेया त्रिविधा सुरा ॥ चतुर्थी स्त्री

सुरा ज्ञेया ययेदं मोहितं जगत्॥२५॥
मद्यपानं महापापं नारीसंगस्तथैव च
॥ तस्माद्द्वयं परित्यज्य तत्त्वनिष्ठो भ-
वेन्मुनिः ॥ २६ ॥ चिन्ताक्रांतं धातु-
वद्धं शरीरं नष्टे चित्ते धातवो यान्ति
नाशम् ॥ तस्माच्चित्तं सर्वतो रक्षणीयं
स्वस्थे चित्ते बुद्धयः संभवन्ति ॥२७॥

दत्तात्रेयावधूतेन निर्मितानन्दरूपिणा ॥ ये पठन्ति च शृण्वन्ति तेषां नैव पुनर्भवः ॥२८॥ इति श्रीदत्तात्रेयकृतायामवधूतगीतायां स्वामिकार्तिकसंवादे स्वात्मसंवित्त्युपदेशोऽष्टमोऽध्यायः॥८॥

इदं पुस्तकं मुम्बापुर्यां निर्णयसागरयंत्रालयाधिपतिना मुद्रितम् । शकाब्दाः १८१९.